Gaekwad's Oriental Series
Published under the Authority of
The Maharaja Sayajirao University
of Baroda

General Editor :
B. J. Sandesara,
M. A., Ph. D.,

No. **135**

CATALOGUE OF PALM-LEAF MANUSCRIPTS IN THE ŚĀNTINĀTHA JAIN BHAṆḌĀRA, CAMBAY

[PART ONE]

CATALOGUE OF PALM-LEAF MANUSCRIPTS IN THE ŚĀNTINĀTHA JAIN BHAṆḌĀRA, CAMBAY

[PART ONE]

by
Āgama - Prabhākara
Muni Puṇyavijaya



ORIENTAL INSTITUTE
BARODA
1961

First Edition : 500 Copies

Printed by Jayanti Dalal, Vasant Printing Press, Ghelabhai's Vadi, Gheekanta, Ahmedabad; and published on behalf of the Maharaja Sayajirao University of Baroda by Dr. Bhogilal J. Sandesara, Director, Oriental Institute, Baroda, March, 1961.

Price Rupees ~~Fifteen~~

Copies can be had of
Manager,
The University Publications Sales Unit,
M. S. University of Baroda Press (Sadhana Press
near Palace Gate, Palace Road, BARODA.

FOREWORD

This is the first part of the Descriptive Catalogue of Palm-leaf Manuscripts in the Śāntinātha Bhaṇḍāra,* Cambay, prepared by Āgama-Prabhākara Muni Śrī Puṇyavijayajī, after a personal scrutiny of each and every manuscript on the spot. Muni Śrī Puṇyavijayajī is a venerable doyen of Prākṛt and Jaina studies in India, who has devoted a whole life-time to the study and preservation of ancient manuscript-libraries, and to the preparation of critical editions of numerous texts and has embarked upon the epoch-making project of preparing a critical edition of the whole of the Jaina Canon, a few volumes of which will be shortly out.

Cambay or Stambhatīrtha of historical fame is famous for its manuscript-libraries, like Pāṭaṇ and Jaisalmer. The G. O. Series (No. 76) has already published a Catalogue of the Palm-leaf MSS. in the Pāṭaṇ Bhaṇḍāra and another (No. 21) of the Jaina Bhaṇḍāra at Jaisalmer. Muni Śrī Puṇyavijayajī has now prepared a Classified Catalogue of all the MSS. collected together from the various local Bhaṇḍāras in the Hemachandrāchārya Jñānamandira at Pāṭaṇ, as well as a fresh Descriptive Catalogue of all important MSS. in the various Bhaṇḍāras at Jaisalmer, and both the works will be shortly out through other agencies.

Śāntinātha Bhaṇḍāra is the most important MSS. library at Cambay, but no such comprehensive attempt was made so far in respect of important literary material deposited there. A few MSS. from the Bhaṇḍāra were referred to by Peterson and others in their Reports which are long out of print and not easily available. A short list of these MSS. in Gujarati script was published a few years back. The present publication was, therefore, a long-felt desideratum and we are very thankful to Muni Śrī Puṇyavijayajī for kindly consenting to publish this Descriptive Catalogue in the Gaekwad's Oriental Series. It needs hardly to be stated that the Praśastis and Colophons of MSS. described in such Catalogues are extremely interesting and useful, as they throw light on many facets of mediaeval history and culture and supply a wealth of information about the social and religious history of various sects, castes and families, and present invaluable materials for the study of place-names. Muni Śrī

* *Bhaṇḍāra* and not *Bhāṇḍāra* is the word prevalent in Gujarat for ancient Jaina manuscript-libraries.

Puṇyavijayaji's Introduction will be published in the second part of this Catalogue.

We are glad that the first part of the Catalogue of the Śāntinātha Bhaṇḍāra is being published; the second part will go to the press very shortly.

We are thankful to the University Grants Commission and the Government of Gujarat for jointly giving full financial aid towards the publication of this volume.

We are also thankful to Shri Jayanti Dalal of the Vasant Printing Press, Ahmedabad, for completing, in an excellent manner, the printing of this work at a very short notice.

Oriental Institute.
Baroda
10-3-61

B. J. SANDESARA
Director

Catalogue of Palm-Leaf Mss.

in the

SANTINĀTHA JAIN BHAṆḌĀRA,

CAMBAY.

JAIN CANONICAL LITERATURE (जैन-आगम-विभाग)

No. 1 (1) Ācārāṅgasūtra (१) आचाराङ्गसूत्र

Folios – 59 (14–58 missing)
Language – Prakrit
Age of MS. – c. 14th century Vikram era

Extent – 2554 Granthas
Size – 32·7 × 2·7 inches
Condition – Good

आदिः—

॥ नमो वीतरागाय ॥ सुयं मे आउसं तेणं भगवया एवमक्खायं—इहमेगेसिं नो सण्णा भवति । तं जहा—पुरत्थिमाओ वा दिसाओ आगतो अहमंसि, दाहिणाओ वा दिसाओ आगओ अहमंसि, पच्चत्थिमाओ वा दिसाओ वा आगओ अहमंसि, उत्तराओ वा दिसाओ आगओ अहमंसि, उड्ढाओ वा दिसाओ आगओ अहमंसि, अहेदिसाओ वा आगओ अहमंसि, अण्णयरीओ वा दिसाओ अणुदिसाओ वा आगओ अहमंसि । एवमेगेसिं णो णायं भवति—अत्थि वा मे आया ओववातिए, णत्थि वा मे आया ओववातिए, के अहमासी? के वा इओ चुए पेच्चा भविस्सामो ? ।

अंतः—

इमम्मि लोए परए य दोसु वी ण विज्जती बंधणं जस्स किंचि वि ।

से हु निरालंबणमप्पतिट्ठिते कलंकलीभावपथं विमुच्चति ॥ त्ति बेमि ॥ छ ॥

विमोत्ती सम्मत्ता । अष्टममध्ययनम् ॥ छ ॥ समाप्तमाचारः प्रथममंगमिति ॥ छ ॥
उद्देशतो ग्रंथाग्रं २५५४ ॥

(2) Ācārāṅgasūtra-Niryukti (२) आचाराङ्गसूत्रनिर्युक्ति

Folios – 59 to 69
Language – Prakrit
Author – Bhadrabāhusvāmī
Age of MS. – Vikrama Samvat 1303
General Remarks – Folio 59 missing.

Extent – 367 Gathās
470 Granthas
Size – 32·7 × 2·5 inches
Condition – Very good

आदिः—

वंदित्तु सव्वसिद्धे जिणे य अणुओगदायए सव्वे ।
आयारस्स भगवतो णिज्जुत्तिं कित्तइस्सामि ॥ १ ॥

अंतः—

एक्कारस ति ति दो दो दो दो उद्देसएहिं नायव्वा ।
सत्तम अट्ठम नवमा एक्कसरा हुंति अज्झयणा ॥ ६७ ॥

सर्वगाथासंख्या २६७ ।। आचारनिर्युक्तिः समाप्ता ।। छ ।। आचारांगवृत्ति १२३०० आचारसूत्र २५०० निर्युक्तिः ४७० ।। छ ।। संवत् १३०३ वर्षे मार्ग वदि १२ गुरौ अद्येह श्रीमदणहिलपाटके महाराजाधिराजश्रीवीसलदेवराज्ये महामात्यश्रीतेजःपालप्रतिपत्तौ श्रीआचारांगपुस्तकं लिखितमिति । कल्याणमस्तु श्रीजिनशासनप्रवचनाय ।। छ ।। मंगलं महाश्रीः ।। छ ।।

*

No. 2 Ācārāṅgasūtra-Ṭīkā **आचाराङ्गसूत्रटीका**

Folios – 282 Extent – 12300 Granthas
Language – Sanskrit Size – 33 × 2·5 inches
Author – Śīlāṅka-ācārya Condition – Very good
Age of MS. – Beginning of 14th century of Vikrama era.

आदिः—

।। नमः सर्वविदे ।।

जयति समस्तवस्तुपर्यायविचारापास्ततीर्थिकं
विहितैकैकतीर्थनयवादसमूहवशात् प्रतिष्ठितम् ।
बहुविधभंगिसिद्धसिद्धांतविधूनितमलमलीमसं
तीर्थमनादिनिधनगतमनुपममादिनतं जिनेश्वरैः ।।
आचारशास्त्रं सुविनिश्चितं यथा जगाद वीरो जगते हिताय यः ।
तथैव किंचिद्वदतः स एव मे पुनातु धीमान् विनयार्पिता गिरः ।।
शस्त्रपरिज्ञाविवरणमतिबहुगहनं च गंधहस्तिकृतम् ।
तस्मात् सुखबोधार्थं गृह्णाम्यहमंजसा सारम् ।।

इह हि रागद्वेषमोहाद्यभिभूतेन संसारिजंतुना शारीरमानसानेकातिकटुकदुःखोपनिपातपीडितेन तदपनयनाय हेयोपादेयार्थपरिज्ञाने यत्नो विधेयः ।

पत्र २२६—

परमार्थपरमकार्यमनुत्तमं मोक्षस्थानं लिप्सुनाऽत्यर्थमालंबनीयमिति । तदात्मकस्य ब्रह्मचर्यश्रुतस्कंधस्य निर्वृतिकुलीनश्रीशीलाचार्येण तत्त्वादित्यापरनाम्ना वाहरिसाधुसहायेन कृता टीका परिसमाप्तेति ।। छ ।।

उप्पायं १ अग्गेणीय २ वीरियं ३ अत्थिनत्थिओ पवायं ४ ।
णाणपवायं ५ सच्चं ६ आयपवायं ७ च कम्मं च ८ ।। १ ।।
पुव्वं पच्चक्खाणं ९ विज्जणुवायं १० अवंझ ११ पाणाउं १२ ।
किरिआविसालपुव्वं १३ चोद्दसमं बिंदुसारं १४ ति ।। २ ।।

उप्पाए पयकोडी १ अग्गेणीयम्मि छण्णउइलक्खा २ ।
विरियम्मि सयरिलक्खा ३ सट्ठिं लक्खा उ अत्थिनत्थिम्मि ४ ॥ ३ ॥
एगा पयाण कोडी णाणपवायम्मि हुंति पुव्वम्मि ५ ।
एगा पयाण कोडी छ च सया सचवायम्मि ६ ॥ ४ ॥
छव्वीसं कोडीओ आयपवायम्मि होति पयसंखा ७ ।
कम्मपवाए कोडी असीइलक्खेहिं अब्भहिया ८ ॥ ५ ॥
चुलसीइपयसहस्सा पच्चक्खाणम्मि वण्णिया पुव्वे ९ ।
एगा पयाण कोडी दससहसहिया तणुपवाए १० ॥ ६ ॥
छव्वीसं कोडीओ पयाग पुव्वे अवंझनामम्मि ११ ।
पाणाउम्मि य कोडी य छप्पण्ण लक्खेहिं संखाया १२ ॥ ७ ॥
नव कोडीओ संखा किरियविसालम्मि वण्णिया गुरुणा १३ ।
अद्धत्तेरस लक्खा पयसंखा बिंदुसारम्मि १४ ॥ ८ ॥
एसा पयाग संखा नंदीए संखिया उ पुव्वाणं ।
भत्तिबहुमागपुव्वं पढियव्वा मोहनिम्महणी ॥ ९ ॥ छ ॥

अंतः—

तद्वान् साधुर्मोक्षसाधनायालमिति तात्पर्यार्थः ॥ छ ॥ आचार्यश्रीशीलांकविरचितायामाचारटीकायां द्वितीयः श्रुतस्कंधः समाप्तः ॥ छ ॥ समाप्तं चाचारांगमिति ॥ छ ॥

आचारटीकाकरणे यदाप्तं पुण्यं मया मोक्षगमैकहेतुः ।
तेनापनीयाशुभराशिमुच्चैराचारमार्गप्रवणोऽस्तु लोकः ॥ छ ॥
ग्रंथाग्रं १२३०० ॥ छ ॥

*

No. 3 (1) Ācārāṅgasūtra (१) आचाराङ्गसूत्र

Folios – 80	Extent – 2644 Granthas
Language – Prakrit	Size – 30·2 × 2·5 inches
Age of MS. – 1327 Vikrama Samvat	Condition – Good

आदिः—

॥ नमः सिद्धेभ्यः ॥ सुयं मे आउसं तेणं भगवया एवमक्खायं इहमेगेसिं णो सण्णा भवति । तं जहा ।

अंतः—

कलंकलीभावपहं विमुच्चइ त्ति बेमि । विमुत्ती सम्मत्ता ॥ छ ॥ आचारसूत्रं समाप्तम् ॥ छ ॥ ग्रंथाग्रं २६४४ ॥ छ ॥

(2) Ācārāṅgasūtra-Niryukti (२) आचाराङ्गसूत्रनिर्युक्ति

Folios – 80 to 92
Language – Prakrit
Author – Bhadrabāhusvāmī
Age of MS. – V. S. [1327]

Extent – 363 Gāthās
Size – 30·2 × 2·5 inches
Condition – Very good

अंतः—

आयारस्स भगवओ चउत्थचूलाए एस निज्जुत्ती ।
पंचमचूल निसीहं तस्स य उवरिं भणीहामि ॥ ३६३ ॥
आयारंगनिज्जुत्ती सम्मत्ता ॥ छ ॥ शुभं भवतु लेखकपाठकयोः ॥ छ ॥

*

No. 4 Ācārāṅgasūtra-Ṭīkā **आचाराङ्गसूत्रटीका**

Folios – 369
Language – Sanskrit
Author – Śīlāṅka-ācārya
Age of MS. – 1327 Vikrama Samvat

Extent – 12000 Granthas
Size – 30 × 2·2 inches
Condition – Good
Date of Composition – 784 Śaka

पत्र ३०२—

सम्यग्दर्शनज्ञानव्रतचरणक्रियाकलापोपेतेन परमार्थपरमकार्यमनुत्तमं मोक्षस्थानं लिप्सुनाऽत्यर्थमालंबनीयमिति तदात्मकस्य ब्रह्मचर्याख्यश्रुतस्कंधस्य निर्वृतिकुलीनश्रीशीलाचार्येण तत्त्वादित्यापरनाम्ना वाहरिसाधुसहायेन कृता टीका परिसमाप्तेति ॥ छ ॥ ग्रंथप्रमाण ९६६१ ॥

सत्त सहस्सा पंच य सयाइं अहियाइं णेय णूणाइं ।
गंथस्स य रइयाइं विहिणा कम्मक्खयट्ठाए ॥
अक्खर मत्ता बिंदू वयण पयं तह य गाह वित्तं च ।
जं एत्थ ण मे लिहियं तं समयविऊहिं खमियव्वं ॥

कृतिः शीलाचार्यस्येति ॥ छ ॥

द्वितीयश्रुतस्कन्धस्यादिः—

जयत्यनादिपर्यंतमनेकगुणरत्नभृत् ।
न्यक्कृताशेषतीर्थेशं तीर्थं तीर्थाधिपैः श्रुतम् ॥
नमः श्रीवीरनाथाय सदाचारविधायिने ।
प्रणताशेषगीर्वाणचूडारत्नार्चितांह्रये ॥
आचारमेरोर्गदितस्य लेशतः प्रवच्मि तच्छेषिकचूलिकागतम् ।
आरिप्सितेऽर्थे गुणवान् कृती सदा जायेत निःशेषमशेषितक्रियः ॥

उक्तो नवब्रह्मचर्याध्ययनात्मक आचारश्रुतस्कंधः । सांप्रतं द्वितीयोऽग्रश्रुतस्कंधः समारभ्यते ।

अंतः—

चरणं क्रिया गुणो ज्ञानं तद्वान् साधुर्मोक्षसाधनायालमिति तात्पर्यार्थः ॥ छ ॥ आचार्यसीलांगविरचितायामाचारटीकायां द्वितीयश्रुतस्कंधः समाप्तः ॥ छ ॥ समाप्तमाचारांगमिति ॥ छ ॥

आचारटीकाकरणे यदाप्तं पुण्यं मया मोक्षगमैकहेतुः ।
तेनापनीयाशुभराशिमुच्चैराचारमार्गप्रवणोऽस्तु लोकः ॥ छ ॥

ग्रंथाग्रं सहस्रद्वादशांकतोऽपि १२००० ॥ छ ॥ शकनृपकालातीतसंवत्सरशतेषु सप्तसु चतुरशीत्यधिकेषु वैशाखपंचम्यां आचारटीका दृब्धेति ॥ छ ॥

शीलाचार्येण कृता गंभूतायां स्थितेन टीकैषा ।
सम्यगुपयुज्य शोध्या मात्सर्यविनाकृतैरार्यैः ॥ २ ॥

इति भद्रम् ॥ छ ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥
उदकानलचौरेभ्यो मूषकेभ्यो विशेषतः ।
रक्षणीया प्रयत्नेन यतः कष्टेन लिख्यते ॥ २ ॥

श्रीभद्रमस्तु ॥ शुभं भवतु लेखकपाठकावधारणादिसमस्तलोकजनश्रावकसंघस्य ॥ छ ॥ सं. १३२७ वर्षे पोष शुदि १० भौमे आचारांगपुस्तकं ठ० विक्रमसिंहेन लिखितमिदमिति ॥ छ ॥ मंगलमस्तु ॥ छ ॥

*

No. 5 Ācārāṅga-Cūrṇi **आचाराङ्गचूर्णि**

Folios – 292
Language – Prakrit
Age of MS. – V. S. 1303
Extent – 8300 Granthas
Size – 24·2 × 2·5 inches
Condition – Fair
General Remarks – Moth-eaten at one end of all leaves.

आदिः—

॥ नमः सर्वज्ञाय ॥

मंगलादीणि सत्थाणि मंगलमज्झाणि मंगलावसाणाणि । मंगलपरिग्गहिया सिस्सा सत्थाणं अवग्गहेहापायधारणासमत्था भवंति, एएण कारणेणं आदौ मंगलं मज्झे मंगलं अवसाणे मंगलमिति । तत्थ अज्झयणकतं आदीये जीवग्गहणं तदत्थित्तप्पसाहणं च । मज्झे मंगलं सम्मत्तलोगसारग्गहणा । अंते मंगलं भगवतो गुणुक्कित्तणा । एतं अज्झयणकयं । एयाणिं सुत्तकयं भण्णति ।

अंतः—

बेमि त्ति न स्वयम्। तीर्थंकरउपदेशात्। आचार्यः सुधर्मो ब्रवीति। सूत्रं वा अहं ब्रवीमि। अर्थं भगवां श्रीवर्द्धमानस्वामीति। अथवाऽस्य वृत्तार्थस्य। अभिनिबंधस्तस्याकर्मंग आचारेण व संपन्नस्य चतुर्थमूलोपचारिणः प्रमादाचरितपंचमचूलविशुद्धांतरात्मनः। इदं फलमपदिश्यते। से हु णिरालंबणमप्पतिट्ठितो शेषं तदेव ॥ छ ॥ इति आचारचूर्णी परि-समाप्ता ॥ छ ॥ नमो सुयदेवयाए भगवईए ॥ छ ॥ ग्रंथाग्रं ८३०० ॥ शुभं भवतु ॥ संवत् १३०३ वर्षेऽद्येह ज्येष्ठ शुदि १५ लिखितमिदम् ॥ श्री ॥

अस्तीह श्रेष्ठपर्वप्रचयपरिचितः क्ष्माभृदाप्तप्रतिष्ठः
सच्छायश्चारुवर्णः सकलसरलतालंकृतः शस्तवृत्तः।
पल्लीवालाख्यवंशो जगति सुविदितस्तत्र मुक्तेव साधुः
साधुव्रातप्रणंता वरहुडिरिति सत्ख्यातिमान् नेमडोऽभूत् ॥ १ ॥

तस्योच्चैस्तनया विशुद्धविनयास्तत्रादिमो राहडो
जज्ञेऽतः सहदेव इत्यभिधया लब्धप्रसिद्धिर्जने।
उत्पन्नो जयदेव इत्यवहितस्वान्तः सुधर्मे तत-
स्तत्राद्यस्य सदा प्रिया प्रियतमा लक्ष्मीः तथा नाइकिः ॥ २ ॥

आद्याया जिनचंद्र इत्यनुदिनं सद्धर्मैकर्मोद्यतः
पुत्रश्चाहिणिसंज्ञिता सहचरी तस्य त्वमी सूनवः।
ज्येष्ठोऽभूत् किल देवचंद्र इति यो द्रव्यं व्ययित्वा निजं
सत्तीर्थेषु शिवाय संघपतिरित्याख्यां सुधीर्लब्धवान् ॥ ३ ॥

नामंधराख्योऽथ महाधराख्योऽतो वीरधवलाभिध-भीमदेवौ।
पुत्री तथा धाहिणिनामिकाऽभूत् सर्वेऽपि जैनांह्रिसरोजभृंगाः ॥ ४ ॥

श्रीदेवभद्रगणिपादसरोरुहालेर्भक्त्याऽनमद् विजयचंद्रमुनीश्वरस्य।
देवेन्द्रसूरिसुगुरोः पदपद्ममूले तत्रान्तिमौ जगृहतुर्यतितां शिवोत्कौ ॥ ५ ॥

नाइकेस्तु सुता जातास्तत्र ज्येष्ठो धनेश्वरः।
खेतूनाम्नी प्रिया तस्य अरिसिंहादयः सुताः ॥ ६ ॥

द्वैतीयीकः सुसाधुश्रुतवचनसुधास्वादनातृप्तचित्तः
श्रीमज्जैनेन्द्रबिम्ब-प्रवरजिनगृह-प्रोल्लसत्पुस्तकादौ।
सप्तक्षेत्र्यां प्रभूतव्ययितनिजधनो लाहडो नामतोऽभूत्
लक्ष्मश्रीरित्यभिख्या सुचरितसहिता तस्य भार्या सदार्या ॥ ७ ॥

अभयकुमाराभिख्यस्तृतीयोऽजनि नंदनः ।
यो दध्रे मानसं धर्मश्रद्धासंबंधबंधुरम् ॥ ८ ॥
धर्मे सहाया सहदेवसाधोः सौभाग्यदेवीति बभूव जाया ।
पुत्रौ च खेढाभिध-गोसलाख्यौ प्रभावकौ श्रीजिनशासनस्य ॥ ९ ॥

किंच ।

यौ कृत्वा गुणसंघकेलिभवनं श्रीसंघमुच्चैस्तरां
श्रीशत्रुंजय-रैवतप्रभृतिषु प्रख्याततीर्थेषु च ।
न्यायोपार्जितमर्थसार्थनिवहं स्वीयं व्ययित्वा भृशं
लेभाते सुचिराय संघपतिरित्याख्यां स्फुटां भूतले ॥ १० ॥
आद्यस्य जज्ञे किल धींवदेवी नाम्ना कलत्रं सुविवेकपात्रम् ।
तथा सुता जेहड-हेमचंद्र-कुमारपालाभिध-पासदेवाः ॥ ११ ॥
अभवद् गोसलसाधोर्गुणदेवीति वल्लभा ।
नंदनो हरिचंद्राख्यो देमतीति च पुत्रिका ॥ १२ ॥
जयदेवस्य तु गृहिणी जाल्हणदेवीति संज्ञिता जज्ञे ।
पुत्रस्तु वीरदेवो देवकुमारश्च हालश्च ॥ १३ ॥
शुभशीलशीलनपरा अभवंस्तेषामिमाः सधर्मिण्यः ।
विजयसिरी-देवसिरी-हरसिणिसंज्ञा यथासंख्यम् ॥ १४ ॥
एवं कुटुंबसमुदय उज्ज्वलवृषविहितवासनाप्रचयः ।
सुगुरोः गुणगणसुगुरोः सुश्राव सुदेशनामेवम् ॥ १५ ॥
दान-शील-तपो-भावभेदाद्धर्मश्चतुर्विधः ।
श्रयणीयः सदा भव्यैर्भाव्यभद्रपदप्रदः ॥ १६ ॥
विषयजसुखमिच्छोर्गेहिनः क्वास्ति शीलं ?
करणवशगतस्य स्यात्तपो वाऽपि कीदृक् ? ।
अनवरतमदभ्रारम्भिणो भावना किं ?
तदिह नियतमेकं दानमेवास्य धर्मः ॥ १७ ॥
ज्ञानाभयोपग्रहदानभेदात्तच्च त्रिधा सर्वविदो वदन्ति ।
तत्रापि निर्वाणपथैकदीपं सज्ज्ञानदानं प्रवरं वदन्ति ॥ १८ ॥
कालानुभावान्मतिमांद्यतश्च तच्चाधुना पुस्तकमन्तरेण ।
न स्यादतः पुस्तकलेखनं हि श्राद्धस्य युक्तं नितरां विधातुम् ॥ १९ ॥

इत्याकर्ण्य सकर्णस्ततश्च निजभुजसमर्जितधनेन ।
आचारांगसुचूर्णेः सुपुस्तकं लेखयामास ॥ २० ॥
यावद् व्योमसरोवरे विलसतो विश्वोपकारेच्छया
सन्नक्षत्रसितांबुजौघकलिते श्रीराजहंसाविह ।
अज्ञानप्रसरांधकारविधुरे विश्वे प्रदीपोपम-
स्तावन्नंदतु पुस्तकोऽयमनिशं वावच्यमानो बुधैः ॥ २१ ॥ छ ॥
॥ मंगलमस्तु ॥ छ ॥

No. 6 (1) Sūtrakṛtāṅgasūtra-Vṛtti (१) **सूत्रकृताङ्गसूत्रवृत्ति**

Folios – 363
Language – Sanskrit
Author – Śīlāṅkācārya
Age of MS. – c. 1327 Vikrama Samvat
Extent – 13000 Granthas
Size – 31·7 × 2·2 inches
Condition – Good
General Remarks – Marginal numbering of folios noteworthy, e.g. – **स्ता र्थु**

आदिः—

स्वपरसमयार्थसूचकमनंतगमपर्ययार्थगुणकलितम् ।
सूत्रकृतमंगमतुलं विवृणोमि जिनान् नमस्कृत्य ॥
व्याख्यातमंगमिह यद्यपि सूरिमुख्यै-
र्भक्त्या तथापि विवरीतुमहं यतिष्ये ।
किं पक्षिराजगतमित्यवगम्य सम्यक्
तेनैव वांछति पथा शलभो न गंतुम् ॥
ये मय्यवज्ञां व्यधुरिद्धबोधा जानंति ते किंचन तानपास्य ।
मत्तोऽपि यो मंदमतिस्तथार्थी तस्योपकाराय ममैष यत्नः ॥

इहापसदसंसारान्तर्गतेनासुमताऽवाप्यातिदुर्लभमनुजत्वसुकुलोत्पत्तिसमग्रेन्द्रियसामग्र्याद्युपेतेनार्हद्दर्शनमशेषकर्मोच्छित्तये यतितव्यम् ।

अंतः—

समाप्ता चेयं सूत्रकृतद्वितीयांगस्य टीका । कृता चेयं श्रीशीलाचार्येण वाहरिगणिसहायेन ।
यदवाप्तमत्र पुण्यं टीकाकरणे मया समाधिभृता ।
तेनापेततमस्को भव्यः कल्याणभाग् भवतु ॥ छ ॥
सर्वग्रं० १३००० ॥ छ ॥

(2) Sūtrakṛtāṅgasūtra-Niryukti (२) सूत्रकृताङ्गसूत्रनिर्युक्ति

Folios - 364 to 371
Language - Prakrit
Author - Bhadrabāhusvāmī
Age of MS. - 1327 V. S. approx
Extent - 205 Gāthās
265 Granthas
Size - 31·7 × 2·2 inches
General Remarks - Marginal numbering of folios, e. g. - स्ता थ १

आदिः—

॥ नमो जिनाय ॥

तित्थयरे य जिणवरे सुत्तकरे गणहरे य नमिऊणं ।
सुत्तगडस्स भगवओ निज्जुत्तिं कित्तइस्सामि ॥

अंतः—

पासावच्चिज्जो पुच्छियाइओ अज्जगोयमं तुदगो ।
सावगपुच्छा धम्मे सोउं कहियम्मि उवसंतो ॥ २०५ ॥

नालंदइज्जनिज्जुत्ती सम्मत्ता ॥ छ ॥ सूयगडस्स बिइओ सुयक्खंधो सम्मत्तो ॥ छ ॥ सम्मत्तं च सूयगडाभिहाणं बिइयमंगं ॥ छ ॥ ग्रंथतः श्लोक २६५ ॥ छ ॥

(3) Sūtrakṛtāṅgasūtra (३) सूत्रकृताङ्गसूत्र

Folios - 371 to 429
Language - Prakrit
Age of MS. - 1327 V. S.
General Remarks - Numbering of folios - स्तो थ उँ
Extent - 2100 Gāthās
2625 Granthas
Size - 31·7 × 2·2 inches
Condition - Good

आदिः—

॥ नमः श्रीवर्धमानाय ॥

बुज्झिज्ज तिउट्टेज्जा बंधणं परिजाणिया ।
किमाह बंधणं वीरे किं वा जाणं तिउट्टई ॥

अंतः—

नालंदइज्जं सम्मत्तं ॥ छ ॥ सम्मत्ताणि महज्झयणाणि चोद्दस सयाणि ॥ छ ॥ सम्मत्तं सूयगडं सूत्रं गाहाए एक्कवीससयाणि ॥ छ ॥ छ ॥ सर्वजातसूत्रे श्लोकाः ॥ २६२५ ॥ सर्वसंख्याजातश्लोक १६६०० ॥ छ ॥ छ ॥ सं. १३२७ वर्षे भाद्रपद वदि २ रवावद्येह वीजापुरे

(4) Sūtrakṛtāṅgasūtra-Niryukti (४) सूत्रकृताङ्गसूत्रनिर्युक्ति

Folios – 7
Language – Prakrit
Author – Bhadrabāhusvāmī
Age of MS. – c. First half of 14th century of Vikrama era
Extent – 205 Gāthās
265 Granthas
Size – 32 × 2·2 inches
Condition – Good

*

No. 7 (1) Sūtrakṛtāṅgasūtra (१) सूत्रकृताङ्गसूत्र

Folios – 64
Language – Prakrit
Age of MS. – c. 1349 V. S.
Size – 30·7 × 2·2 inches
Condition – Good

अंतः—

नालंदिअज्जं समत्तं ॥ छ ॥ समत्ता महज्झयणा ॥ छ ॥ समत्तो सूयगडबीय-सुयखंधो ॥ छ ॥ समत्तं बीयं सूयगडंगं ॥ छ ॥ शुभं भवतु लेषकपाठकयोः ॥ छ ॥

(2) Sūtrakṛtāṅgasūtra-Niryukti (२) सूत्रकृताङ्गसूत्रनिर्युक्ति

Folios – 65 to 72
Language – Prakrit
Author – Bhadrabāhusvāmī
Age of MS. – c. 1349 V. S.
Extent – 208 Gāthās
Size – 30·7 × 2·2 inches
Condition – Good

अंतः—

सावगपुच्छा धम्मं सोउं कहियम्मि उवसंतो ॥ २०८ ॥
सूयगडणिज्जुत्ती समत्ता ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥

(3) Sūtrakṛtāṅgasūtra-Vṛtti (३) सूत्रकृताङ्गसूत्रवृत्ति

Folios – 73 to 463
Language – Sanskrit
Author – Śīlāṅkācārya
Age of MS. – 1349 V. S.
Extent – 13000 Granthas
Size – 30·7 × 2·2 inches
Condition – Good

General Remarks – Five folios in the beginning as well as in the end are not in good condition. Numbering of folios – ११ता थुं ३

अंतः—

ग्रंथाग्र १३००० ॥ छ ॥ शुभ भवतु ॥ छ ॥
शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ॥ छ ।

नमः श्रीवर्द्धमानाय वर्द्धमानाय वेदसा ।
वेदसारं परं ब्रह्म ब्रह्मबद्धस्थितिश्च यः ॥ १ ॥
स्वबीजमुप्तं कृतिभिः कृषीवलैः क्षेत्रे सुसिक्तं शुभभाववारिणा ।
क्रियेत यस्मिन् सफलं शिवश्रिया पुरं तदत्रास्ति दयावटाभिधम् ॥ २ ॥
ख्यातस्तत्रास्ति वस्तुप्रगुणगुणगणः प्राणिरक्षैकदक्षः
सज्ज्ञाने लब्धलक्ष्यो जिनवचनरुचिश्चंचदुच्चैश्चरित्रः ।
पात्रं पात्रैकचूडामणिजिनसुगुरूपासनावासनायाः
संघः सुश्रावकाणां सुकृतमतिरमी सन्ति तत्रापि मुख्याः ॥ ३ ॥
होनाकः सज्जनज्येष्ठः श्रेष्ठी कुमरसिंहकः ।
सोमाकः श्रावकश्रेष्ठः शिष्टधीररिसिंहकः ॥ ४ ॥
कडुयाकश्च सुश्रेष्ठी सांगाक इति सत्तमः ।
खीम्वाकः सुहडाकश्च धर्मकर्मैककर्मठः ॥ ५ ॥
एतन्मुखः श्रावकसंघ एषोऽन्यदा वदान्यो जिनशासनज्ञः ।
सदा सदाचारविचारचारुक्रियासमाचारशुचिव्रतानाम् ॥ ६ ॥
श्रीमज्जगच्चन्द्रमुनीन्द्रशिष्यश्रीपूज्यदेवेन्द्रसूरीश्वराणाम् ।
तदाद्यशिष्यत्वभृतां च विद्यानन्दाख्यविख्यातमुनिप्रभूणाम् ॥ ७ ॥
तथा गुरूणां सुगुणैर्गुरूणां श्रीधर्मघोषाभिधसूरिराजाम् ।
सद्देशनामेवमपापभावां शुश्राव भावावनतोत्तमांगः ॥ ८ ॥
विषयसुखपिपासोर्गेहिनः क्वास्ति शीलं
करणवशगतस्य स्यात् तपो वाऽपि कीदृक् ।
अनवरतमदभ्रारम्भिणो भावनाः का-
स्तदिह नियतमेकं दानमेवास्य धर्मः ॥ ९ ॥

किंच—

धर्मः स्फूर्जति दानमेव गृहिणां ज्ञानाभयोपग्रहै-
स्त्रेधा तद्वरमाद्यमत्र यदितो निःशेषदानोदयः ।
ज्ञानं चाद्य न पुस्तकैर्विरहितं दातुं च लातुं च वा
शक्यं पुस्तकलेखनेन कृतिभिः कार्यस्तदर्थोऽर्थवान् ॥ १० ॥
श्रुत्वेति संघसमवायविधीयमानज्ञानार्चनोद्भवधनेन मिथः प्रवृद्धिम् ।
नीतेन पुस्तकमिदं श्रुतकोशवृद्ध्यै बद्धादरश्चिरमलेखयदेष हृष्टः ॥ ११ ॥

यावज्जिनमतभानुः प्रकाशिताशेषवस्तुविस्तारः ।
जगति जयतीह पुस्तकमिदं बुधैर्वाच्यतां तावत् ॥ १२ ॥ छ ॥

संवत् १३४९ वर्षे मार्ग शुदि .... अद्येह दयावटे श्रे० होना श्रे० कुमरसीह श्रे० सोमाप्रभृतिसंघसमवायसमारब्धपुस्तकभांडागारे ले० सीहाकेन लिखितम् ॥ छ ॥

*

No. 8 Sthānāṅgasūtra-Vṛtti **स्थानाङ्गसूत्रवृत्ति**

Folios – 320
Language – Sanskrit
Author – Abhayadevasūri
Age of MS. – c. First half of 14th cent. V. S.
Extent – 14250 Granthas
Size – 32·2 × 2·5 inches
Condition – Good
Date of Compo. – 1120 V. S.

आदिः—

॥ नमः श्रीवर्द्धमानाय ॥
श्रीवीरं जिननाथं नत्वा स्थानांगकतिपयपदानाम् ।
प्रायोऽन्यशास्त्रदृष्टं करोम्यहं विवरणं किंचित् ॥

इह हि श्रमणस्य भगवतः श्रीमन्महावीरवर्धमानस्वामिनः इक्ष्वाकुकुलनन्दनस्य प्रसिद्धसिद्धार्थराजसूनोर्महाराजस्येव

अंतः—

इति श्रीमदभयदेवसूरिविरचिते स्थानाख्यतृतीयांगविवरणे दशस्थानकाख्यं दशममध्ययनं समाप्तमिति ॥ छ ॥ तत्समाप्तौ च समाप्तं स्थानांगविवरणम् । तथा च यदादावभिहितं स्थानांगस्य महानिधानस्येवोन्मुद्रणमिवानुयोगः प्रारभ्यत इति तच्चंद्रकुलीनप्रवचनप्रणीताप्रतिबद्धविहारहारिचरितश्रीवर्द्धमानाभिधानमुनिपतिपादोपसेविनः प्रमाणादिव्युत्पादनप्रवणप्रकरणप्रबंधप्रणायिनः प्रबुद्धप्रतिबंधकप्रवक्तृप्रवीणाप्रतिहतप्रवचनार्थप्रधानवाक्प्रसरस्य सुविहितमुनिजनमुख्यस्य जिनेश्वराचार्यस्य तदनुजस्य च व्याकरणादिशास्त्रकर्त्तुः श्रीबुद्धिसागराचार्यस्य चरणकमलचंचरीककल्पेन श्रीमदभयदेवसूरिनाम्ना मया महावीरजिनराजसंतानवर्त्तिना महाराजवंशजन्मनेव संविग्नमुनिवर्गप्रवरश्रीमदजितसिंहाचार्यान्तेवासियशोदेवगणिनामधेयसाधोरुत्तरसाधकस्येव विद्याक्रियाप्रधानस्य साहाय्येन समर्थितम् । तदेवं सिद्धमहानिधानस्येव समापिताऽधिकृताऽनुयोगस्य मम मंगलार्थं पूज्यपूजा—नमो भगवते वर्त्तमानतीर्थनाथाय श्रीमन्महावीराय । नमः प्रतिपंथिसार्थप्रमथनाय श्रीपार्श्वनाथाय । नमः प्रवचनबोधिकायै श्रीप्रवचनदेवतायै । नमः प्रस्तुतानुयोगशोधकाय श्रीद्रोणाचार्यप्रमुखपंडितपर्षदे । नमः चतुर्वर्णाय श्रीश्रमणसंघभट्टारकायेति । एवं च निजवंशवत्सलराजसंतानिकस्येव

ममासमानमिममायासमतिसफलतां नयंतो राजवंश्या इव वर्द्धमानजिनसंतानवर्तिनः स्वीकुर्वन्तु यथोचितमितोऽर्थजातम्, अनुतिष्ठंतु सुष्ठूचितपुरुषार्थसिद्धिम्, उपयुंजतां च योगेभ्य इति । किंच—

सत्संप्रदायहीनत्वात् समूहस्य वियोगतः ।
सर्वस्वपरशास्त्राणामदृष्टेरस्मृतेश्च मे ॥ १ ॥
वाचनानामनेकत्वात् पुस्तकानामशुद्धितः ।
सूत्राणामतिगांभीर्यात् मतभेदाच्च कुत्रचित् ॥ २ ॥
क्षूणानि संभवंतीह केवलं सुविवेकिभिः ।
सिद्धांतानुगतो योऽर्थः सोऽस्माद् ग्राह्यो न चेतरः ॥ ३ ॥
शोध्यं चैतज्जिने भक्तैर्मामवद्भिर्दयापरैः ।
संसारकारणाद् घोरादपसिद्धांतदेशनात् ॥ ४ ॥
कार्या न चाक्षमाऽस्मासु यतोऽस्माभिरनाग्रहैः ।
एतद्गमनिकामात्रमुपकारीति चर्चितम् ॥ ५ ॥
तथा संभाव्य सिद्धांताबाध्यं मध्यस्थया धिया ।
द्रोणाचार्यादिभिः प्राज्ञैरनेकैराद्दतं यतः ॥ ६ ॥
जैनग्रंथविशालदुर्गमवनादुद्धृत्य गाढश्रमं
सद्व्याख्यानफलान्यमूनि मयका स्थानांगसद्भाजने ।
संस्थाप्योपहितानि दुर्गतनरप्रायेण लब्धार्थिना
श्रीमत्संघविभोरतः परमसावेव प्रमाणं कृती ॥ ७ ॥
श्रीविक्रमादित्यनरेन्द्रकालाच्छतेन विंशत्यधिकेन युक्ते ।
समासहस्रेऽतिगते विदब्धा स्थानांगटीकाऽल्पधियोऽपि गम्या ॥ ८ ॥ छ ॥

ग्रंथाग्रं १४२५० ॥ छ ॥ मंगलं महाश्री ॥ शुभं भवतु ॥ छ ॥

*

No. 9 Bhagavatīsūtra **भगवतीसूत्र**

Folios – 67 to 578
Size – 30·2×2·2 inches
Language – Prakrit
Condition – Good
Age of MS. – c. Beginning of 14th cent. V. S.
General Remarks – Only few scribal errors. Folios 569 to 578 written later.
Folios 1 to 66 and 131 to 206 missing.
Marginal numbering of folios – **ास्तो थू द्दा**

अंतः—

सेवं भंते ति भगवं **गो**तमे समणं भगवं **म**हावीरं तिक्खुत्तो आदाहिणपदाहिणं करेति । तिक्खुत्तो आयाहिणपयाहिणं करेत्ता वंदति नमंसति । वंदित्ता णमंसित्ता एवं वदासि । एवमेयं भंते ! जुत्तमेयं भंते ! पडिगतमेयं भंते ! असंदिद्धमेयं भंते ! इच्छियमेयं भंते ! पडिच्छियं भंते ! । सच्चे णं एसमट्ठे जण्णं तुब्भे वदह त्ति कट्टु । अपूतिवयणा खलु अरहंता भगवंतो । समणं भगवं **म**हावीरं वंदति नमंसति । वंदित्ता नमंसित्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरति । **रा**सीजुम्मसतं सम्मत्तं । ४२ सतं सव्वाए **भ**गवतीते अट्ठत्तीसं सताणं १३८ उद्देसाणं १९२५ ।

चुलसीतिसयसहस्सा पवरवरनाणदंसिपन्नत्ता ।
भावाभावमणंतं एत्थंगे एय परिमाणं ॥
तवनियमविणयवेलो जयइ सया नाणविमलविउलजलो ।
हेउसयविउलवेगो **सं**घसमुद्दो गुणगभीरो ॥

रासीजुम्मसतं समत्तं ॥ छ ॥ समत्ता य **भ**गवती ॥ छ ॥

तेलोक्कसारभूया अणेगगमहेउलक्खणोवेया ।
उक्कित्तिया **भ**गवई **वि**याहमंगस्स पण्णत्ती ॥
एस गहिया वि संती थद्धे गारवियमाणिपडिणीते ।
अबहुस्सुए अदेया तव्विवरीते भवे देया ॥
सड्ढाधितिउट्ठाणुच्छाहकम्मबलविरियपुरिसकारेहिं ।
जो सिक्खिदो वि संतो अभायणे पक्खिवेज्जाहि ॥
सो पवयणकुलगणसंघबाहिरो णाणविणयपरिहीणो ।
अरहंतसिद्धपवयणमेरं किर होइ वोलीणो ॥
तम्हा धितिउट्ठाणुच्छाहकम्मबलविरियसिक्खियं णाणं ।
धारेयव्वं णियमं ण य अविणीएसु दायव्वं ॥ छ ॥
आदिल्लेसु य अट्ठसु बारस तेरस य चोद्दस तहेव ।
अट्ठारे एगुणवीस वीसे दस उद्देसगा होंति ।

पण्णत्तीए आदिमाणं अट्ठण्हं सताणं दो दो उद्देसगा उद्दिसिज्जंति । नवरं चउत्थ-सते पढमदिवसे अट्ठ बितियदिवसे दो उद्देसगा उद्दिसिज्जंति । नवमसयातो आरद्धं जावतियं ठवेति तावतितं उद्दिसिज्जति । उक्कोसेण सतं पि एगदिवसेणं, मज्झिमेणं दोहिं दिवसेहिं सतं, जहण्णेणं तिहिं दिवसेहिं सतं, एवं जाव वीसतिमं सतं । नवरं गोसालो एगदिवसेण उद्दिसिज्जति । जति ट्ठितो एगेण चेव आयंबिलेणं अणुण्णव्वति, अह ण ट्ठिओ

आयंबिलछट्ठेणं अणुण्णव्वति । एक्कवीसबावीसतेवीसइमाइं सयाइं एक्केक्कदिवसेण उद्दिसिज्जं-ति । चउवीसइमं चउहिं दिवसेहिं छ छ उद्देसगा । पंचवीसइमं दोहिं दिवसेहिं छ छ उद्देसगा । गमियाणं आदिमाणं सत्तसयाइं एक्केक्कदिवसेण उद्दिसिज्जंति । एगिंदियसताइं बारस एगेण दिवसेण । सेढिसयाइं बारस एगेण । एगिंदियमहाजुम्मसयाइं बारस एगेण । एवं बेंदियाणं बारस तेइंदियाणं बारस चउरिंदियाणं बारस एगेण । अस्सण्णिपंचिंदियाणं बारस सण्णिपंचिंदियमहाजुम्मसयाइं एक्कवीसं एगदिवसेण उद्दिसिज्जंति । रासीजुम्मसतं एगदिवसेण उद्दिसिज्जति ॥ छ ॥ एवं सोलसहिं दिवसेहिं गमियाइं उद्दिसिज्जंति । एतेसिं पुण पढमसताइं उद्दिसिज्जंति । पच्छा अट्ठ उद्देसगा उद्दिसिज्जंति । ते चेव समुद्दिसिऊणं एवं अणुण्णव्वंति । तओ एगसरं पच्छा सताइं अणुण्णविज्जंति । चउद्दसिपण्णरसीसु णत्थि उद्देसो पुव्वुद्दिट्ठं जं तंमि पक्खे तं पढिज्जंति । पढमसते एगंतराइं आयंबिलाइं ततो पच्छा सत्तमे सत्तमे दिवसे आयंबिलं जाव गोसालो । ततो पच्छा नवमे नवमे दिवसे आयंबिलं । खंदय-चमरेसु पंच पंच दत्तीओ दोण्ह वि होऊण भोयणपाणाणं । गोसाले तिण्णि दत्तीओ, दो भोयणस्स एगा पाणगस्स, अहवा एगा भोयणस्स दो पाणगस्स । इच्छाए खंदयचमरेसु वि विभागो । चमरेऽह्रीते ओगाहिमट्ठितीए गोसकाउस्सग्गो कीरइ पडुप्पण्णाए वा अप्पडुप्पणाए वा सव्वकालस्स चेव पदे दिज्जइ । चरिमा एगलिहियस्स आयंबिलं पोरिसीए पढिज्जइ । उग्घाडतालियं परियट्टिज्जइ । जं पुण पोरिसीए दो तिण्णि दंडे अक्कंता उग्घाडतालियं पि पढिज्जइ, नवण्हं विगतीणं अवेयणा वि उवहम्मति । भत्तपाणलोहेण न उवहम्मइ, न पुण च्छिविय्व्वं, छिक्के काउस्सग्गो कीरइ । चम्मअट्ठियसण्णाउ सुक्काइं ण उवहणंति, उल्लाइं उवहणंति । जं पुण जोगवाहिस्स असज्झाइयं सज्झाइयं वा सा न चेव उवहणति । तिरि-याणं चउप्पयाणं पक्खीणं च आमिसासीण दव्वेण छिक्कं तं अण्णं दिवसं न उवहणति । दीवओ वि ण उवहणति । चम्मट्ठियसण्णाओ सुक्काइं पि न छिवियव्वाइं, छिक्केण अणा-भोगेण काउस्सग्गो । कासारसंजाओ पायसविसंदणाइं कप्पंति । अगारीए कप्पट्ठगरूयं थणपियतं मुंचति । ण य त्थणे य दंडी सतितो कप्पिया भवति । एवं गोणिमादीओ वि सव्वं च जं अकप्पियं तं दुपयं परं न उवहणति । जं च थिरं कवाडकट्ठमादी अकप्पितेण दव्वेण लित्तं तं न उवहणति । जति तं दव्वं ण छिवति । जोगवाहिणा हत्थसतबाहिं एगागिणा न गंतव्वं । अध कहिंचि भत्तपाणं उवहतं ताहे जइ कप्पितेण पाणएणं भाणं हत्था वा कप्पियाओ उल्लेहिं वि हत्थेहिं तुल्ले वि पत्ते घेप्पति । अह अकप्पिएण पाणएण कप्पिया सते सते परियट्टिते परियट्टावणियकाउस्सग्गो कीरइ । खंदयचमरेसु य गमियाणं सोलस काउस्सग्गो खंदयचमरगोसाला पढिज्जंति । काउस्सग्गेण परियट्टिज्जंति । काउस्सग्गेण चेव जति पण धम्मं कहेति । अब्भत्थेइ वा कोति ताहे ट्ठितो काउस्सग्गेणं कड्ढति । पण्णत्ती

पुण उद्दिसिज्जंति । सुक्कपक्खे उस्सग्गेण कण्हपक्खे वा जाव पंचमी । जति साहगं अणुकूलं अत्थि । उद्देसणक्खत्तेसु दससु अणंतरे भणिता । सेसाइं थिराइं दिवड्ढखेत्ताइं रोहिणि-मादीणि जोगो उच्चारिज्जति उद्दिसंतेहिं ॥ छ ॥ पण्णत्तीए उद्देसो सम्मत्तो ॥ छ ॥ मंगलं महाश्री ॥ छ ॥ शुभं भवतु ॥ छ ॥ छ ॥

*

No. 10 Bhagavatīsūtra-Vṛtti **भगवतीसूत्रवृत्ति**

Folios – 401
Language – Sanskrit
Author – Abhayadevasūri
Date of Composition – 1128 V. S.

Age of MS. – 1298 V. S.
Extent – 18616 Granthas
Size – 32·2 × 2·7 inches
Condition – Good

General Remarks – Numbering of folios **स्ता**
o
१

For folio 300 we have letter symbol स्त and for folio 400 we have स्ता here, whereas generally we find स्त, स्ता and ास्ता for 200, 300 and 400.

आदिः—

॥ ॐ नमः सर्वज्ञाय ॥

सर्वज्ञमीश्वरमनन्तमसंगमग्र्यं सर्वीयमस्मरमनीशमनीहसिद्धम् ।
सिद्धं शिवं शिवकरं करणव्यपेतं श्रीमज्जिनं जितरिपुं प्रयतः प्रणौमि ॥
नत्वा श्रीवर्धमानाय श्रीमते च सुधर्मणे ।
सर्वानुयोगवृद्धेभ्यो वाण्यै सर्वविदस्तथा ॥
एतट्टीका-चूर्णी-जीवाभिगमादिवृत्तिलेशांश्च ।
संयोज्य पंचमांगं विवृणोमि विशेषतः किंचित् ॥

व्याख्यातं समवायाख्यं चतुर्थमंगम् । अथावसरायातस्य विवाहपण्णत्ति त्ति संज्ञितस्य पंचमांगस्य...............गुरुजनवचनात् पूर्वमुनिशिल्पिकुलोत्पन्नैरस्माभिर्नाडि-केवेयं वृत्तिरारभ्यत इति शास्त्रप्रस्तावना ॥

अंतः—

इति भगवतीविशेषवृत्तिः समाप्ता ॥ छ ॥

यदुक्तमादाविह साधुयोधैः श्रीपंचमांगोन्नतकुंजरोऽयम् ।
सुखाधिगम्योऽस्त्विति पूर्वगुर्वी प्रारभ्यते वृत्तिवरत्रिकेयम् ॥ १ ॥
समर्थितं तत्पदबुद्धिसाधुसाहायकात्केवलमत्र सन्तः ।
सद्बुद्धिदात्र्याऽपगुणाल्लुनंतु सुखग्रहा येन भवत्यथैषा ॥ २ ॥

चान्द्रे कुले सद्वनकक्षकल्पे महाद्रुमो धर्मफलप्रदानात् ।
छायान्वितः शस्तविशालशाखः श्रीवर्द्धमानो मुनिनायकोऽभूत् ॥ ३ ॥
तत्पुष्पकल्पौ विलसद्विहारसद्गंधसंपूर्णदिशौ समंतात् ।
बभूवतुः शिष्यवरावनीचवृत्ती श्रुतज्ञानपरागवंतौ ॥ ४ ॥
एकस्तयोः सूरिवरो जिनेश्वरः ख्यातस्तथाऽन्यो भुवि बुद्धिसागरः ।
तयोर्विनेयेन विबुद्धिनाऽप्यलं वृत्तिः कृतैषाऽभयदेवसूरिणा ॥ ५ ॥
तयोरेव विनेयानां तत्पदं चानुकुर्वताम् ।
श्रीमतां जिनचंद्राख्यसत्प्रभूणां नियोगतः ॥ ६ ॥
श्रीमज्जिनेश्वराचार्यशिष्याणां गुणशालिनाम् ।
जिनभद्रमुनींद्राणामस्माकं चांह्रिसेविनः ॥ ७ ॥
यशश्चन्द्रगणेर्गाढसाहाय्यात् सिद्धिमागता ।
परित्यक्तान्यकृत्यस्य युक्तायुक्तविवेचिनः ॥ ८ ॥
शास्त्रार्थनिर्णयसुसौरभलंपटस्य विद्वन्मधुव्रतगणस्य सदैव सेव्यः ।
श्रीनिर्वृताख्यकुलसन्नदपद्मकल्पः श्रीद्रोणसूरिरनवद्ययशःपरागः ॥ ९ ॥
शोधितवान् वृत्तिमिमां युक्तो विदुषां महासमूहेन ।
शास्त्रार्थनिष्कनिकषणकषपट्टककल्पबुद्धीनाम् ॥ १० ॥
विशोधिता तावदियं सुधीभिस्तथापि दोषाः किल संभवंति ।
मन्मोहतस्तांश्च विहाय सद्भिस्तद् ग्राह्यमाप्ताभिमतं यदस्याम् ॥ ११ ॥
यदवाप्तं मया पुण्यं वृत्ताविह शुभाशयात् ।
मोहाद् वृत्तिजमन्यच्च तेनागो मे विशुद्ध्यतात् ॥ १२ ॥
प्रथमादर्शे लिखिता विमलगणिप्रभृतिभिर्निजविनेयैः ।
कुर्वद्भिः श्रुतभक्तिं दक्षैरधिकं विनीतैश्च ॥ १३ ॥
अस्याः करणव्याख्याश्रुतिलेखनपूजनादिषु यथार्हम् ।
दायिकसुतमाणिक्यः प्रेरितवानस्मदादिजनान् ॥ १४ ॥
अष्टाविंशतियुक्ते वर्षसहस्रे शतेन चाभ्यधिके ।
अणहिलपाटकनगरे कृतेयमच्छुप्तधनिवसतौ ॥ १५ ॥
अष्टादश सहस्राणि षट् शतान्यथ षोडश ।
इत्येवं मानमेतस्यां श्लोकमानेन निश्चितम् ॥ १६ ॥ छ ॥

॥ ग्रंथ १८६१६ ॥ छ ॥ शुभं भवतु ॥ छ ॥ संवत् १२९८ वर्षे मार्ग सुदि १३

सोमे । अद्येह वीजापुरे सा० सहदेवेन सा० राहडसुत लाहडेन सा० देवचंद्रप्रभृतिभिः समुदायेन भगवतीवृत्तिपुस्तकं लिखापितं । लेखितं अरिसीहेण ॥ छ ॥ मंगलं ॥ संवत् १२९८ फागुण सु. ३ गुरौऽद्येह वीजापुरे पूज्य श्रीदेवचंद्रसूरिश्रीविजयचंद्रसूरिव्याख्या- नतः संसारासारतां विचिंत्य सर्वज्ञोक्तं शास्त्रं प्रमाणमिति मनसि ज्ञात्वा सा० राहडसुत जिणचंद्र धणेसर लाहड सा० सहदेवसुत सा० षेढासंघवी गोसलप्रभृति कुटुंबसमुदायेन चतुर्विधसंघस्य पठनार्थं वाचनार्थं च लिखापितमिति ॥ छ ॥

अस्तीह श्रेष्ठपर्वप्रचयपरिचितः क्ष्माभृदाप्तप्रतिष्ठः ०....इत्यादि (See क्रमांक ५)

इत्याकर्ण्य ततो निजधनेन सत्पत्रसंचयैर्भक्त्या ।
श्रीभगवतीसुतवृत्तेः पुस्तकमिति लेखयामास ॥ २० ॥
यावद् व्योमसरोवरे० ॥ २१ ॥ ठ० अरिसीहेन लिखितम् ॥ छ ॥

*

No. 11 (1) Jñātādharmakathāṅgasūtra (१) ज्ञाताधर्मकथाङ्गसूत्र

Folios – 154
Language – Prakrit
Age of MS. – c. 1307 V. S.
Extent – 5065 Granthas
Size – 26·5 × 2·2 inches
Condition – Good.

(2) Jñātādharmakathāṅgasūtra-Vṛtti (२) ज्ञाताधर्मकथाङ्गसूत्रवृत्ति

Folios – 120
Language – Sanskrit
Author – Abhayadevasūri
Date of Composition – 1120 V. S.
Age of MS. – 1307 V. S.
Extent – 3700 Granthas
Size – 27 × 2·2 inches

अंतः—

संवत १३०७ वर्षे

अस्तीह श्रेष्ठपर्वतप्रचयपरिचितः क्ष्माभृदाप्तप्रतिष्ठः० इत्यादि (See क्रमांक ५)

Here folio 121 is missing hence the Praśasti is up to 18 śloka only (for the Praśasti, vide, क्रमाङ्क ५ above).

*

No. 12 (1) Jñātādharmakathāṅgasūtra (१) ज्ञाताधर्मकथाङ्गसूत्र

Folios – 142
Language – Prakrit
Age of MS. – c. 1184 V. S.
Extent – 5065 Granthas
Size – 28·2 × 2·2 inches
Condition - Good

General Remarks – Nos. 1 to 8 bound in one Ms. no. 12; the folio nos. being continuous, the age of no. 8 below is treated as age of nos. 1 to 7 also.

अंतः—

एवं खलु जंबू ! निक्खेवगो दसमवग्गस्स दसमो वग्गो सम्मत्तो ॥

एवं खलु जंबू ! समणेणं भगवया महावीरेणं आतिगरेणं तित्थयरेणं सयंसंबुद्धेणं पुरिसोत्तिमेणं पुरिससीहेणं धम्मकहासुयक्खंधो सम्मत्तो । दसहिं वग्गेहिं नायधम्मकहातो सम्मत्ताओ ॥ छ ॥ छ ॥ ग्रन्थसंख्या ५०६५ ॥ छ ॥

(2) Upāsakadaśāṅgasūtra **(२) उपासकदशाङ्गसूत्र**

Folios – 143 to 165
Language – Prakrit
Age of MS. – c. 1184 V. S.
Size – 28·2 × 2·2 inches
Condition – good

आदिः—

॥ नमो सुयदेवयाए ॥

तेणं कालेणं तेणं समएणं चंपा णाम णयरी । पुन्नभद्दे चेइए । वण्णओ । तेणं कालेणं तेणं समएणं अज्जसुधम्मे समोसरिए । जाव जंबू पज्जुवासति । एवं वयासि । जइ णं भंते ! सम० जाव संप० छट्ठस्स अंगस्स णायाधम्मकहाणं अयमट्ठे पण्णत्ते । सत्तमस्स णं भंते ! अंगस्स उवासगदसाणं सम० जाव संप० के अट्ठे पण्णत्ते । एवं खलु जंबू ! सम जाव संप० सत्तमस्स उवासगदसाणं दस अज्झयणा पन्नत्ता ।

अंतः—

एवं खलु जंबू ! समणेणं जाव संपत्तेणं सत्तमस्स अंगस्स उवासगदसाणं । दसमस्स अज्झयणस्स अयमट्ठे पण्णत्ते त्ति ॥ छ ॥ उवासगदसातो सम्मत्तातो ॥ छ ॥ उवासगदसाणं सत्तमस्स अंगस्स एगो सुयक्खंधो दस अज्झयणा एक्कसरगा । दससु चेव दिवसेसु उद्दिसंति । ततो सुयक्खंधो समुद्दिसति । अणुनव्वइ । दोसु दिवसेसु अंगं तहेव ॥ छ ॥

(3) Antakṛddaśāṅgasūtra **(३) अन्तकृद्दशाङ्गसूत्र**

Folios – 166 to 187
Language – Prakrit
Age of MS. – c. 1184 V. S.
Size – 28·2 × 2·2 inches
Condition – Good

आदिः—

तेणं कालेणं तेणं समतेणं चंपा णाम णयरी । पुण्णभद्दे चेइए । वन्नओ । तेणं कालेणं तेणं समएणं अज्जसुहम्मे ०सरिते । परिसा णिग्गता । जाव पडिगया । तेणं कालेणं तेणं समएणं............ । जइ णं भंते ! समणेणं आदिकरेणं जाव संपत्तेणं सत्तमस्स उवासगदसाणं अयमट्ठे पण्णत्ते । अट्ठमस्स णं भंते ! अंगस्स अंतगडदसाणं जाव संपत्तेणं के अट्ठे पण्णत्ते ।

अंतः—

एवं खलु जंबू ! समणेणं भगवया महावीरेणं आदिगरेणं जाव संपत्तेणं । अट्ठम-अंगस्स अंतगडदसाणं अयमट्ठे पन्नत्ते ॥ छ ॥ अंतगडदसातो सम्मत्तातो ॥ छ ॥ अट्ठमं.. अंगं सम्मत्तं ॥ छ ॥ अंतगडदसाणं अंगस्स एगो सुयक्खंधो अट्ठ वग्गा अट्ठसु चेव दिवसेसु उद्दिसिज्जंति । तत्थ पढमबितियवग्गे दस दस उद्देसगा । ततियवग्गे तेरस उद्देसगा । चउत्थपंचमवग्गे दस २ उद्देसगा । छट्ठवग्गे सोलस उद्देसगा । सत्तमवग्गे तेरस उद्देसगा । अट्ठमवग्गे दस उद्देसगा । सेसं जहा णायाधम्मकहाणं ॥ छ ॥

(4) Anuttaraupapātikadaśāṅgasūtra **(४) अनुत्तरौपपातिकदशाङ्गसूत्र**

Folios – 187 to 193 Size – 28·2 × 2·2 inches
Language – Prakrit Condition – good
Age of MS. – c. 1184 V. S.

General Remarks – Three beautiful painted decorations are seen on folio 193, two in the two margins and one in the centre. The marginal figures show a mithuna and a lotus, while in the centre is a swan.

आदिः—

तेणं कालेणं तेणं समएणं रायगिहे णगरे अज्जसुहम्मस्स समोसरणं । परिसा णिग्गता । जाव जंबू पज्जुवासति । एवं च जइ णं भंते ! समणेणं जाव संपत्तेणं अट्ठमस्स अंगस्स अंतगडदसाणं अयमट्ठे पण्णत्ते । णवमस्स णं भंते ! अंगस्स अणुत्तरोववाइयदसाणं जाव संपत्तेणं के अट्ठे पण्णत्ते ? ।

अंतः—

सिवमयलमरुयमणंतमक्खयमव्वाबाहमपुणरावत्तयं सिद्धिगइणामधेयं ठाणं संपत्तेणं अणुत्तरोववाइयदसाणं तच्चस्स वग्गस्स अयमट्ठे पण्णत्ते । अणुत्तरोववाइयदसातो सम्मत्तातो ॥ छ ॥ नवमं अंगं सम्मत्तं ॥ छ ॥

(5) Jñātādharmakathāṅgasūtra-Vṛtti **(५) ज्ञाताधर्मकथाङ्गसूत्रवृत्ति**

Folios – 194 to 297 Age of MS. – c. 1184 V. S.
Language – Sanskrit Extent – 3700 Granthas
Author – Abhayadevasūri Size – 28·2 × 2·2 inches
Date of Composition – 1120 V. S. Condition – Good

General Remarks – One of the earliest palm-leaf Western Indian miniature is preserved on folio 194, on natural back-ground, and the colour of the palm-leaf forms a beautiful back-ground to the white figures of the Tīrthankara with a standing attendant on each side. The lower garments

of all these figures are in red; the Caitya-tree over Jina's head and the scarfs of the attendants are in green.

आदिः—

॥ ॐ नमो जिनागमाय ॥ ॐ नमो गणाधिपतये ॥

नत्वा श्रीमन्महावीरं प्रायोऽन्यग्रंथवीक्षितः ।
ज्ञाताधर्मकथांगस्यानुयोगः कश्चिदुच्यते ॥ १ ॥

तत्र च फलमंगलादिचर्चः स्थानान्तरादवसेयः ।

अंतः—

शेषं सूत्रसिद्धम् ॥ छ ॥ समाप्तो द्वितीयश्रुतस्कन्धः ॥ छ ॥ समाप्ता चेयं ज्ञाताधर्मकथाप्रदेशटीकेति ॥ छ ॥

नमः श्रीवर्द्धमानाय श्रीपार्श्वप्रभवे नमः ।
नमः श्रीमत्सरस्वत्यै सहायेभ्यो नमो नमः ॥ १ ....
तस्याचार्यजिनेश्वरस्य मदवद्वादिप्रतिस्पर्द्धिनः,
तद्बन्धोरपि बुद्धिसागर इति ख्यातस्य सूरेर्भुवि ।
छंदोबंधनिबंधबंधुरवचःशब्दादिसल्लक्ष्मणः,
श्रीसंविग्नविहारिणः श्रुतनिधेश्चारित्रचूडामणेः ॥ ८ ॥
शिष्येणाभयदेवाख्यसूरिणा विवृतिः कृता ।
ज्ञाताधर्मकथाङ्गस्य श्रुतभक्त्या समासतः ॥ ९ ॥
निर्वृतिककुलनभस्तलचंद्रद्रोणाख्यसूरिमुख्येन ।
पण्डितगणेन गुणवत्प्रियेण संशोधिता चेयम् ॥ १० ॥
एकादशसु शतेष्वथ विंशत्यधिकेषु विक्रमसमानाम् ।
अणहिलपाटकनगरे विजयदशम्यां च सिद्धेयम् ॥ ११ ॥
प्रत्यक्षरं निरूप्यास्य ग्रंथमानं विनिश्चितम् ।
अनुष्टुभां सहस्राणि त्रीणि सप्त शतानि च ॥ १२ ॥ छ ॥

(6) Upāsakadaśāṅgasūtra-Vṛtti (६) उपासकदशाङ्गसूत्रवृत्ति

Folios – 298 to 319
Language – Sanskrit
Author – Abhayadevasūri
Date of Composition – c. 1120 V. S.

Age of MS. – c. 1184 V. S.
Size – 28·2 × 2·2 inches
Condition – Good

आदिः—

श्रीवर्द्धमानमानम्य व्याख्या काचिद् विधीयते ।
उपासकदशादीनां प्रायो ग्रंथांतरेक्षिता ॥

तत्रोपासकदशा सप्तममंगमिह चाभिधानार्थ उपासकानां श्रमणोपासकानां सम्बन्धिनोऽनुष्ठानस्य प्रतिपादिका दशाध्ययनरूपा उपासकदशाः । बहुवचनान्तमेतद्ग्रन्थनाम ।

अंतः—

यदिह न व्याख्यातं तत्सर्वं ज्ञाताधर्मकथाव्याख्यानमुपयुक्तेन निरूप्यावसेयमिति ॥ छ ॥

सर्वस्यापि स्वकीयं वचनमभिमतं प्रायशः स्याज्जनस्य,
यत्तु स्वस्यापि सम्यग् नहि विहितरुचि स्यात् कथं तत् परेषाम् ? ।
चित्तोल्लासात् कुतश्चित्तदपि निगदितं किंचिदेवं मयैतत्,
युक्तं यच्चात्र तस्य ग्रहममलधियः कुर्वतां प्रीतये मे ॥ छ ॥

समाप्तमुपासकदशाविवरणम् ॥ छ ॥

(7) Antakṛddaśāṅgasūtra-Vṛtti (७) अन्तकृद्दशाङ्गसूत्रवृत्ति

Folios – 319 to 326
Language – Sanskrit
Author – Ābhayadevasūri
Date of Composition – c. 1120 V. S.
Age of MS. – c. 1184 V. S.
Size – 28·2 × ·2·2 inches
Condition – Good

आदिः—

अथान्तकृद्दशासु किमपि विव्रियते ।

अंतः—

यदिह न व्याख्यातं तज्ज्ञाताधर्मकथाविवरणतोऽवसेयम् । एवं च समाप्तमन्तकृद्दशाविवरणमिति ॥ छ ॥

अनन्तगमपर्यये जिनवरोदिते शासने
यकेह समयानुगा गमनिका किल प्रोच्यते ।
गमान्तरमुपैति सा तदपि सद्भिरस्यां कृता-
वरूढगमशोधनं ननु विधीयतां सर्वथा ॥ इति ॥ छ ॥

(8) Anuttaraupapātikadaśāṅgasūtra-Vṛtti (८) अनुत्तरौपपातिकदशाङ्गसूत्रवृत्ति

Folios – 326 to 331
Language – Sanskrit
Author – Abhayadevasūri
Date of Composition – c. 1120 V. S.
Age of MS. – 1184 V. S.
Extent – 1300 Granthas in all of Upāo, Antao and Anuo-Vṛttis
Size – 28·2 × 2·2 inches
Condition – Good

General Remarks – Very few scribal errors. In the right margin of folio 330 is painted a figure of a swan while in the left one is an elephant surrounded by lotuses. In the centre of folio 330 is the now well-known miniature of Sarasvati

standing with two sitting devotees on her sides, the one on the right being called श्रे० देसलः, and the figure on the left, शुभंकरः in the miniature itself. See, Shah, U. P., *Studies in Jaina Art*, fig. 66; Sarabhai Nawab, *Jain-Citrakalpadruma*, fig. .... Dr. U. P. Shah suggests that the typical elongated forms of Sarasvati (folio 330) and of the two attendants on folio 194, as also the somewhat oblong face show Karṇātak-Deccan influence.

आदिः—

अथानुत्तरौपपातिकदशासु किंचिद् व्याख्यायते ।

अंतः—

शेषमन्तकृद्दशांगवदिति ॥ छ ॥ अनुत्तरोपपातिकाख्यातं नवमांगप्रदेशविवरणं समाप्तमिति ॥ छ ॥

शब्दाः केचन नार्थतोऽपि विदिताः केचित्तु पर्यायतः,
तत्रार्थानुगतेः समूह्य भणतो यज्जातमागःपदम् ।
वृत्तावत्र तकज्जिनेश्वरवचोभाषाविधौ कोविदैः
संशोध्यं विहितादरैः जिनमतोपेक्षा यतो न क्षमा ॥ छ ॥
प्रत्यक्षरं निरूप्यास्य ग्रंथमानं सुनिश्चितम् ।
वृत्तीनां तिसृणां श्लोकसहस्रं त्रिशताधिकम् ॥ छ ॥

मङ्गलं महाश्रीः ॥ छ॥ संवत् ११८४ माघ सु. ११ रवौ अद्येह श्रीमदणहिलपाटके महाराजाधिराजश्रीजयसिंघदेवकल्याणविजयराज्ये ज्ञाताधर्मकथाद्यङ्गवृत्तिर्लिखितेति ॥ छ ॥

शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ॥ छ ॥

ज्ञाताधर्मकथाद्यङ्गचतुष्टयवृत्तिः ॥ छ ॥ श्रीवर्द्धमानसूरीयश्रीचक्रेश्वरसूरीणां श्रीपरमाणंदसूरीणां श्रे० देशलपुत्रयशहडसूलणरामदेवस्य पुस्तकमिदम् ॥ छ ॥

प्राज्यच्छायो जन्मभूमिर्गुणानां दिक्पर्यन्तव्यापिशाखाकलापः ।
पत्रोपेतः पर्वभिर्वर्द्धमानः प्राग्वाटानामस्ति विस्तारिवंशः ॥ १ ॥
तत्र प्रजज्ञे हृदयालयेषु कृतस्थितिः पुण्यवतो जनस्य ।
वृत्तोज्ज्वलः कांतिकलापपात्रं मुक्तामणिः श्रावकसर्वदेवः ॥ २ ॥
अवदाता प्रभेवास्य तमःप्रसरवारिणी ।
महिमेति भुवि ख्याता बभूव सहचारिणी ॥ ३ ॥
ताभ्यां पुरस्कृतनयस्तनयोऽजनिष्ट निष्ठापरः परमसंयमिनां परीष्टौ ।
राजन्यमान्यमहिमाहिमपूरगौरैः ख्यातो गुणैर्जगति झुंझुलनामधेयः ॥ ४ ॥

जाताऽस्य प्रेयसी मान्या सीमान्या रूपसम्पदः ।
पूर्णदेवीति सौभाग्यमसौ भाग्यं च बिभ्रती ॥ ५ ॥
जातमपत्यचतुष्टयमाभ्यामभ्यस्तशस्तजिनधर्मम् ।
भुवनगुरुबिम्बपूजनकृतादरं मंदिरं नीतेः ॥ ६ ॥
प्रथमो देहडनामा देशलनामा सुतोऽपरस्तत्र ।
सोहिणि-पुन्निणिसंज्ञे पुत्र्यौ पात्रं विनयलक्ष्म्याः ॥ ७ ॥
एषां मध्ये सदयहृदयो धार्मिकः श्रावकाणां
मुख्यः श्रीमान् मथितकुमतो वर्त्तते देशलाख्यः ।
यस्याजस्रं श्रवणपुटकैः सद्यशःक्षीरपूरं,
पायं पायं कथमपि जना नैव तृप्तिं भजन्ति ॥ ८ ॥

किंच—

गाम्भीर्येण पयोनिधेर्धिषणया वृंदारकाणां गुरो-
स्तुंगत्वेन सुपर्वपर्वतपतेः सौम्येन शीतत्विषः ।
सौन्दर्येण मनोभवस्य विभवित्वेनोत्तराशापते-
र्योऽत्यन्तं प्रतिपंथ्यपि त्रिजगतीमित्रं परं कीर्त्यते ॥ ९ ॥

अन्यच्च—

न्यायार्जितेन विभवेन भवान्तहेतोः स्वीयालयोचितमनूननयेन येन ।
त्रैलोक्यकैरवविकासशशांकबिम्बं बिम्बं विधापितमपश्चिमतीर्थभर्तुः ॥ १० ॥
शीलालंकारवती स्थिरदेवी वल्लभाऽभवच्चास्य ।
रेमे यदीयमनसा मनागपि न तीर्थिकवचस्सु ॥ ११ ॥
अनयोः संजातास्ते तनूरुहाः बाहडादयः सदयाः ।
मारो हतिमारोहति विलोक्य कायश्रियं येषाम् ॥ १२ ॥
अन्यदा देशलः श्रुत्वा तथाविधगुरोर्गिरः ।
प्रवृत्तश्चेतसा सार्द्धं समालोचयितुं चिरम् ॥ १३ ॥

तथाहि—

अहो भ्रातश्चेतो गुणगणनिधे ! किं नु भणसि ?
क्षणं वार्त्तामेकां शृणु ननु मदीयामवहितम् ।
भवांभोधेर्मध्ये महति पततां हंत भविनां
विना जैनं धर्मं किमपि शरणं नास्ति नियतम् ॥ १४ ॥
ज्ञानादिभेदैः स पुनस्त्रिभेदः प्ररूपितो यद्यपि पूज्यपादैः ।
लातव्य-हातव्य-विवेकहेतुस्तथापि विज्ञानममीषु मुख्यम् ॥ १५ ॥

मतिज्ञानादिभिर्भेदैस्तच्च प्रावाचि·पंचधा ।
स्वान्यावभासकत्वेन श्रुतज्ञानं परं परम् ॥ १६ ॥
हे चित्त ! किंचित्तदमुत्र भक्ति विधातुमिच्छामि धनव्ययेन ।
मनस्ततः प्राह विधेहि शीघ्रं धर्मे न यस्मादुचितो विलम्बः ॥ १७ ॥
इदं हि बिम्यद्धरिणीकटाक्षसहोदरं द्रव्यमुदाहरन्ति ।
अनेन चेन्निश्चलपुण्यराशिर्विढप्यते चारु वणिज्यमेतत् ॥ १८ ॥
इत्थं निजेन मनसा मुनिनायकैश्च चक्रेश्वरेत्यभिधया प्रथितैः पृथिव्याम् ।
प्रोत्साहितः सपदि देशलनामधेयो ग्रंथानलीलिखदमूंश्चतुरः सटीकान् ॥१९॥
धरति धरणीं शेषो यावन्निजे फणमंडपे
कनकशिखरी देवैर्यावत् स नंदथु सेव्यते ।
गगनपथिकः सूर्यो यावत् प्रकाशयते दिशो
भ्रमभरमसौ तावत् पुंसामपास्यतु पुस्तकः ॥ २० ॥

॥ प्रशस्तिः समाप्ता ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥ ज्ञाताधर्मकथाद्यंगचतुष्टयसूत्र-वृत्तिपुस्तकं श्रीयशोदेवसूरीणां श्रीश्रीप्रभसूरीणां श्रे० देशलपुत्रयशहड-सूलण-रामदेव-आल्हणश्रावकाणाम् । मंगलं महाश्रीः ॥ छ ॥

*

No. 13 (1) Jñātādharmakathāṅgasūtra (१) ज्ञाताधर्मकथाङ्गसूत्र

Folios – 107
Language – Prakrit
Age of MS. – c. 13th century V. S.
Extent – 5000 Granthas
Size – 31·5 × 2·5 inches
Condition – Good

आदिः—

॥ ॐ नमो वीतरागाय ॥ तेणं कालेणं तेणं समएणं चंपा णाम णगरी होत्था । वण्णओ । तीसे णं चंपाए णयरीए बहिया उत्तरपुरत्थिमे दिसीभाए पुण्णभद्दे णामं चेइए होत्था । वण्णओ । तत्थ णं चंपाए णयरीए कोणिए णामं राया होत्था । वण्णओ । तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स अंतेवासी अज्जसुहम्मे नाम थेरे जाइ-.संपण्णे कुलसंपण्णे ....सिवमयलमरुयमणंतमक्खयमव्वाबाहमपुणरावत्तयं सासयं ठाणमुवगतेणं पंचमअंगस्स विवाहपन्नत्तीए अयमट्ठे पण्णत्ते । छट्ठस्स णं अंगस्स भंते ! णायाधम्मकहाणं के अट्ठे पण्णत्ते । जंबू ! ति अज्ज सुहंमे थेरे अज्जजंबूणामं अणगारं एवं वयासी । एवं खलु जंबू ! समणेणं भगवया महावीरेणं जाव संपत्तेणं छट्ठस्स अंगस्स दो सुयक्खंधा पन्नत्ता । तं जहा णायाणि य धम्मकहाओ य ।

अंतः—

दसहि वग्गेहिं नायाधम्मकहाओ सम्मत्ताओ ॥ छ ॥ ग्रं. ५००० ॥ छ ॥

(2) Jñātadharmakathāṅgasūtra-Vṛtti (२) ज्ञाताधर्मकथाङ्गसूत्रवृत्ति

Folios – 108 to 210
Language – Sanskrit
Author – Abhayadevasūri
Date of Composition – c. 1120 V. S.
Age of MS. – End of 13th century V. S.
Extent – 3800 (3700) Granthas
Size – 31·5 × 2·5 inches

(3) Upāsakadaśāṅgasūtra (३) उपासकदशाङ्गसूत्र

Folios – 211 to 230
Language – Prakrit
Age of MS. – End of 13th century V. S.
Extent – 812 Granthas
Size – 31·5 × 2·5 inches
Condition – Good

अंतः—

ततो सुयक्खंधो समुद्दिसिज्जति अणुण्णवेज्जति । दोसु दिवसेसु अंगं तहेव ॥ छ ॥ ग्रन्थाग्रं श्लोक ८१२ ॥ छ ॥

(4) Antakṛddaśāṅgasūtra (४) अन्तकृद्दशाङ्गसूत्र

Folios – 230 to 249
Language – Prakrit
Age of MS. – End of 13th century V. S.
Extent – 790 Granthas
Size – 31·5 × 2·5 inches
Condition – Good

अंतः—

अट्ठमवग्गे दस उद्देसगा । सेसं जहा नायाधम्मकहाणं ॥ छ ॥ ग्रंथाग्रं ७९० उभयं १६३७ ॥ अंतगडदशांगसूत्रं समाप्तं अष्टममंगं ॥ छ ॥

(5) Anuttaraupapātikadaśāṅgasūtra (५) अनुत्तरौपपातिकदशाङ्गसूत्र

Folios – 249 to 254
Language – Prakrit
Age of MS. – End of 13th century V. S.
Extent – 192 Granthas
Size – 31·5 × 2·5 inches
Condition – Good

अंतः—

अणुत्तरोववाइयदसातो सम्मत्तातो ॥ छ ॥ अणुत्तरोववाइयदसाणं सूत्रं समाप्तं नवममंगं ॥ छ ॥ ग्रंथाग्रं १९२ ॥ छ ॥ नमो सुयदेवयाए अणुत्तरोववाइयदसाणं एक्को सुयक्खंधो तिन्नि वग्गा तिसु चेव दिवसेसु उद्दिसंति । तत्थ पढमवग्गे दस उद्देसगा । बितियवग्गे तेरस उद्देसगा । ततियवग्गे दस उद्देसगा । सेसं जहा धम्मकहाणं तहा नेयव्वं ॥

(6) Praśnavyākaraṇadaśāṅgasūtra (६) प्रश्नव्याकरणदशाङ्गसूत्र

Folios – 254 to 284
Language – Prakrit
Age of MS. – End of 13th century V. S.
Extent – 1300 Granthas
Size – 31·5 × 2·5 inches
Condition – Good

आदिः—

नमो अरहंताणं । जंबू !
इणमो अण्हयसंवरविणिच्छयं पवयणस्स निस्संदं ।
वोच्छामि णिच्छयत्थं सुभासियत्थं महेसीहिं ॥
पंचविहो पन्नत्तो जिणेहिं इह अण्हओ अणादीओ ।
हिंसा मोसमदत्तं अब्बंभ परिग्गहं चेव ॥
जारिसओ जंनामा जह य कओ जारिसं फलं देति ।
जे वि य करेंति पावा पाणवहं तं निसामेह ॥
पाणवहो णाम एस णिच्चं जिणेहिं भणिओ पावो चंडो रुद्दो

अंतः—

एयाति वयाइं पंच वि सुव्वयमहव्वयाइं हेउसयविचित्तपुक्कलाइं कहियाइं अरहंत-सासणे पंच समासेण संवरा, वित्थरेण उ पणुवीसतिं समियसहियसंवुडे सता जयणघडण-सुविसुद्धदंसणे । एए अणुचरिय संजते चरिमसरीरधरे भविस्सतीति ॥ छ ॥ इति **प्रश्न-व्याकरणानि** समाप्तानि ॥ छ ॥ **पन्हावागरणाणं** एगो सुयक्खंधो दस अज्झयणा एक्कसरगा •दससु चेव दिवसेसु उद्दिस्संति । एक्कंतरेसु आयंबिलेसु निरुद्धेसु आउत्तभत्तपाणएणं अंगं जहा **आयारस्स** ॥ छ ॥

सुजनो न याति विकृतिं परहितनिरतो विनाशकालेऽपि ।
छेदेऽपि चंदनतरुः सुरभयति मुखं कुठारस्य ॥ छ ॥
ग्रन्थाग्रं श्लोक १३०० त्रयोदश शतानि ॥ छ ॥

(7) Vipākasūtra (७) विपाकसूत्र

Folios - 284 to 312
Language - Prakrit
Age of MS. - End of 13th century V. S.
Extent - 1376 Granthas
Size - 31·5 × 2·5 inches
Condition - Good

आदिः—

॥ नमो वीतरागाय ॥ तेणं कालेणं तेणं समएणं **चंपा** नाम नगरी होत्था वन्नओ । **पुन्नभद्दे** चेतिते । अहापडिरूवं जाव विहरति । परिसा निग्गया । धम्मं सोच्चा निसम्म जामेव दिसं पाउब्भूया तामेव दिसं पडिगया । .... जति णं भंते ! समणेणं भगवया **महावीरेणं** जाव संपत्तेणं दसमस्स **पण्हावागरणाणं** अंगस्स अयमट्ठे पन्नत्ते । एक्कारसमस्स णं भंते ! अंगस्स **विवागसुयस्स** समणेणं जाव संपत्तेणं के अट्ठे पन्नत्ते । तते णं **अज्जसुहम्मे** अणगारे **जंबू** अणगारं एवं वयासी । एवं खलु **जंबू** ! समणेणं जाव संपत्तेणं एक्कारसमस्स अंगस्स दो सुयक्खंधा पन्नत्ता । तं जहा—**दुहविवागो** य **सुहविवागो** य ।

अंतः—

एवं खलु जंबू! समणेणं जाव संपत्तेणं सुहविवागाणं दसमस्स अज्झयणस्स अयमट्ठे पण्णत्ते । सेवं भंते ! सुहविवागो ॥ छ ॥ एकादसमं अंगं सम्मत्तं ॥ छ ॥ नमः श्रुतदेवतायै । विवागसुयस्स दो सुयक्खंधा दुहविवागो सुहविवागो य । तत्थ दुहविवागे दस अज्झयणा एक्कसरगा । दससु चेव दिवसेसु उद्दिस्संति । एवं सुहविवागे वि । सेसं जहा आयारस्स ॥ छ ॥ ग्रंथाग्रं श्लोक १३७६ ॥ छ ॥

(8) Upāsakadaśāṅgasūtra-Vṛtti (८) उपासकदशाङ्गसूत्रवृत्ति

Folios - 313 to 332
Language - Sanskrit
Author - Abhayadevasūri
Date of Composition - c. 1120 V. S.
Age of MS. - 1295 V. S.
Size - 31·5 × 2·5 inches
Condition - Good

(9) Antakṛddaśāṅgasūtra-Vṛtti (९) अन्तकृद्दशाङ्गसूत्रवृत्ति

Folios - 332 to 339
Language - Sanskrit
Author - Abhayadevasūri
Date of Composition - c. 1120 V. S.
Age of MS. - 1295 V. S.
Size - 31·5 × 2·5 inches
Condition - Good

(10) Anuttaraupapātikadaśa-Vṛtti (१०) अनुत्तरौपपातिकदशावृत्ति

Folios - 339 to 341
Language - Sanskrit
Author - Abhayadevasūri
Date of Composition - c. 1120 V. S.
Age of MS. - 1295 V. S.
Extent - 1300 Granthas in all of Vṛttis nos. 8, 9, 10
Size - 31·5 × 2·5 inches
Condition - Good

अंतः—

प्रत्यक्षरं निरूप्यास्य ग्रन्थमानं विनिश्चितम् ।
वृत्तीनां तिसृणां श्लोकसहस्रं त्रिशताधिकम् ॥

॥ कृतिरियं श्रीमज्जिनेश्वराचार्यपादोपजीविश्रीमदभयदेवाचार्याणामिति ॥ छ ॥ शुभं भवतु श्रीश्रमणसंघस्य ॥ छ ॥

(11) Praśnavyākaraṇadaśāṅgasūtra-Vṛtti (११) प्रश्नव्याकरणदशाङ्गसूत्रवृत्ति

Folios - 341 to 449
Language - Sanskrit
Author - Abhayadevasūri
Date of Composition - c. 1120 V. S.
Age of MS. - 1295 V. S.
Extent - 4600 Granthas
Size - 31·5 × 2·5 inches
Condition - Good

आदिः—

॥ नमः श्रीवर्द्धमानाय ॥

श्रीवर्द्धमानमानम्य व्याख्या काचिद् विधीयते ।
प्रश्नव्याकरणांगस्य वृद्धव्याख्यानुसारतः ॥
अज्ञा वयं शास्त्रमिदं गभीरं प्रायोऽस्य कूटानि च पुस्तकानि ।
सूत्रं व्यवस्थाप्यमतो विमृश्य व्याख्यानकल्पादित एव नैव ॥

अथ प्रश्नव्याकरणाख्यं दशमांगं व्याख्यायते । अथ कोऽस्याभिधानस्यार्थः ।

अंतः—

सत्पुरुषतीरितानि निर्वाणगमनस्वर्गप्रणायकानि पंचापि संवरद्वाराणि समाप्तानीति ब्रवीमीति ॥ छ ॥ समाप्ता प्रश्नव्याकरणटीका ॥ छ ॥

नमः श्रीवर्द्धमानाय श्रीपार्श्वप्रभवे नमः ।
नमः श्रीमत्सरस्वत्यै सहायेभ्यो नमो नमः ॥ १ ॥
इह हि गमनिकार्थं यन्मयाऽभ्यूह्योक्तं किमपि समयहीनं तद्विशोध्यं सुधीभिः ।
न हि भवति विधेया सर्वथाऽस्मिन्नुपेक्षा दयितजिनमतानां तायिनां चांगिवर्गे ॥२॥
परेषां दुर्लक्षा भवति हि विवक्षा स्फुटमिदं विशेषाद् वृद्धानामतुलवचनज्ञानमहसाम् ।
निराम्नायाधीभिः पुनरतितरां मादृशजनैस्ततः शास्त्रार्थे मे वचनमनघं दुर्लभमिह ॥३॥
ततः सिद्धांततत्त्वज्ञैः स्वयमूह्यः प्रयत्नतः ।
न पुनरस्मदाख्यात एव ग्राह्यो नियोगतः ॥ ४ ॥
तथैवं माऽस्तु मे पापं संघमत्युपजीवनात् ।
वृद्धन्यायानुसारित्वाद्धितार्थं च प्रवृत्तितः ॥ ५ ॥
यो जैनाभिमतं प्रमाणमनघं व्युत्पादयामासिवान्
प्रस्थानैर्विविधैर्निरस्य निखिलं बौद्धादिसंबंधि तत् ।
नानावृत्तिकथाः कथापथमतिक्रान्तं च चक्रे तपो
निःसंबंधविहारमप्रतिहतं शास्त्रानुसारात्तथा ॥ ६ ॥
तस्याचार्यजिनेश्वरस्य मदवद्वादिप्रतिस्पर्द्धिन-
स्तद्बन्धोरपि बुद्धिसागर इति ख्यातस्य सूरेर्भुवि ।
छन्दोबन्धनिबद्धबंधुरवचःशब्दादिसल्लक्ष्मणः
श्रीसंविग्नविहारिणः श्रुतनिधेश्चारित्रचूडामणेः ॥ ७ ॥
शिष्येणाभयदेवाख्यसूरिणा विवृतिः कृता ।
प्रश्नव्याकरणांगस्य श्रुतभक्त्या समासतः ॥ ८ ॥

निर्वृतककुलनभस्तलचन्द्रद्रोणाख्यसूरिमुख्येन ।
